# Question Bank (प्रश्नकोषः) 2025-26

## Code - UG DSC 604

## न्याय-वैशेषिकदर्शनप्रवीणः

**ग्रन्थौ - न्यायसिद्धान्तमुक्तावली(अनुमानोपमानशब्दखण्डाः) एवञ्च न्यायभाष्यम् (प्रथमोऽध्यायः)**

| लघूत्तरप्रश्नाः | | |
|---|---|---|
| 1 | कः परामर्शः? | व्यापरः/ व्याप्यस्य पक्षवृत्तित्वधीः परामर्शः। |
| 2 | अनुमितौ करणं किम्? | व्याप्तिज्ञानम्। |
| 3 | ज्ञायमानं लिङ्गमनुमितौ करणं न वा? | न। |
| 4 | पर्वतो धूमवानिति कीदृशं ज्ञानम्? | पक्षधर्मताज्ञानम्। |
| 5 | साहचर्यनियमः क उच्यते? | व्याप्तिः |
| 6 | पूर्वपक्षव्याप्तिलक्षणं किम्? | साध्यवदन्याऽवृत्तित्वम् |
| 7 | सिद्धान्तव्याप्तेर्लक्षणं किम्? | हेत्वधिकरणवृत्त्यभावप्रतियोगिसाध्यसामानाधिकरण्यम्। |
| 8 | समवायेन वह्न्यधिकरणं किम्? | वह्नेरवयवाः। |
| 9 | वह्निमान् धूमादित्यत्र हेतुतावच्छेदकसम्बन्धः कः? | संयोगः। |
| 10 | सामानाधिकरण्यं नाम किम्? | समानम् एकमधिकरणं ययोः तयोः सामानाधिकरण्यम्। |
| 11 | पर्वतो धूमवान् वह्नेरित्यत्र साध्यः कः? | धूमः |
| 12 | हेतोः पञ्चरूपाणि कानि? | पक्षसत्त्व-सपक्षसत्त्व-विपक्षासत्त्व-अबाधितत्त्व-असत्प्रतिपक्षत्वानि |
| 13 | हेत्वधिकरणं कथं वाच्यम्? | हेतुतावच्छेदकविशिष्टाधिकरणं वाच्यम्। |
| 14 | अभावः कथं बोध्यः? | प्रतियोगिव्यधिकरणो बोध्यः। |
| 15 | प्रतियोग्यनधिकरणत्वं कथं वाच्यम्? | प्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वम्। |
| 16 | कः पक्षः? | सन्दिग्धसाध्यवान् पक्षः। |
| 17 | सपक्षः कः? | निश्चितसाध्यवान्। |
| 18 | विपक्षः कः? | निश्चितसाध्याभाववान् |
| 19 | का नाम पक्षता? | सिषाधयिषाविरहविशिष्टसिद्ध्यभावः |
| 20 | का नाम सिषाधयिषा? | साधयितुमिच्छा |
| 21 | हेत्वाभासाः कति? के च ते? | पञ्च। सव्यभिचार-विरुद्ध-सत्प्रतिपक्ष-असिद्ध-बाधिताः। |
| 22 | सव्यभिचारः कतिविधः? के च ते? | त्रिविधः। साधारणासाधारणानुपसंहारिभेदात्। |
| 23 | हेत्वाभाससामान्यलक्षणं किम्? | यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वम्। |
| 24 | असिद्धः कतिविधः? के च ते? | त्रिविधः। आश्रयासिद्धः स्वरूपासिद्धः व्याप्यत्वासिद्धश्चेति। |
| 25 | उपमितिकरणं किम्? | उपमानम् |
| 26 | का नाम उपमितिः? | संज्ञासंज्ञिसम्बन्धज्ञानम् |
| 27 | उपमितौ व्यापारः कः? | अतिदेशवाक्यार्थस्मरणम् उपमितौ व्यापारः। |
| 28 | शाब्दबोधे करणं किम्? | पदज्ञानम्। |
| 29 | का नाम शक्तिः? | अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसङ्केतः शक्तिः। |
| 30 | शाब्दबोधे व्यापारः कः? | पदजन्यपदार्थस्मरणं शाब्दबोधे व्यापारः। |
| 31 | वृत्तिः कतिविधा? के च ते? | द्विविधा, शक्तिलक्षणा चेति। |
| 32 | शक्तिग्रहः कस्माद्भवति? | व्याकरणोपमानकोशाप्तवाक्य-व्यवहार-वाक्यशेष-विवरण-सान्ध्यतः सिद्धपदस्य कथनाच्च। |
| 33 | आधुनिके नाम्नि शक्तिरस्ति न वा? | अस्ति |

| | | |
|---|---|---|
| 34 | पिकपदवाच्यः क इति कथं शक्तिग्रहो भवति? | आप्तवाक्यात् |
| 35 | जातिशक्तिवादिनः के? | मीमांसकाः |
| 36 | जात्याकृतिविशिष्टव्यक्तौ शक्तिरिति केषां मतम्? | नैयायिकानाम् |
| 37 | पदचातुर्विध्यं किम्? | यौगिकम्, रूढम्, योगरूढम्, यौगिकरूढम् |
| 38 | का नाम लक्षणा? | शक्यसम्बन्धो लक्षणा |
| 39 | लक्षणा कतिविधा? काश्च ताः? | त्रिविधा, जहद्, अजहद्, जहदजहच्चेति |
| 40 | का नाम लक्षितलक्षणा? | शक्यार्थस्य परम्परासम्बन्धरूपा लक्षणा |
| 41 | शाब्दबोधकारणानि कानि? | आसत्तियोग्यताकाङ्क्षातात्पर्यज्ञानानि। |
| 42 | आकाङ्क्षा अर्थात् किम्? | यत्पदेन विना यस्याननुभावकता भवेत्। |
| 43 | योग्यता का? | एकपदार्थेऽपरपदार्थसम्बन्धः। |
| 44 | आसत्तिर्नाम का? | अन्वयप्रतियोग्यनुयोगिपदयोरव्यवधानम्। |
| 45 | किं नाम तात्पर्यम्? | वक्तुरिच्छा |
| 46 | गौतममहर्षिणा रचितं दर्शनं किम्? | न्यायदर्शनम्। |
| 47 | न्यायभाष्यस्य कर्ता कः? | महर्षिवात्स्यायनः। |
| 48 | न्यायसूत्रे कति अध्यायाः सन्ति? | ५। |
| 49 | यमुद्दिश्यप्रवर्तते तत् किम्? | प्रयोजनम्। |
| 50 | गन्ध................तदर्थाः। पूरयत। | गन्धरसरूपस्पर्शशब्दाः पृथिव्यादिगुणास्तदर्थाः। |
| 51 | बुद्धेः अर्थान्तरं किम्? | उपलब्धिः ज्ञानं वा। |
| 52 | सदसद्विषयकं किमुच्यते? | अनुमानम्। |
| 53 | अनुमानं कतिविधम्? किञ्च तत्? | त्रिविधम्, पूर्ववच्छेशवत्सामान्यतोदृष्टञ्च। |
| 54 | सूत्रोक्तं प्रत्यक्षलक्षणं किम्? | इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षम्। |
| 55 | व्याभिचारिबुद्धिः कीदृशी? | अतस्मिन्स्तद्बुद्धिः। |
| 56 | आत्मनो लिङ्गं किम्? | इच्छाद्वेषप्रयत्नसुखदुःखज्ञानान्यात्मनो लिङ्गम्। |
| 57 | मनसो लिङ्गं किम्? | युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्। |
| 58 | किं नाम दुःखम्? | बाधनालक्षणं दुःखम्। |
| 59 | कः अपवर्गः? | तदत्यन्तविमोक्षोऽपवर्गः। |
| 60 | दृष्टान्तः कः? | लौकिकपरीक्षकाणां यस्मिन्नर्थे बुद्धिसाम्यं स दृष्टान्तः। |
| 61 | निग्रहस्थानं कीदृशम्? | विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम्। |
| 62 | वादः कः? | प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वादः । |
| 63 | कः सव्यभिचारः? | अनैकान्तिको सव्यभिचारः। |
| 64 | हेत्वाभासाः के? | सव्यभिचार-विरुद्ध-प्रकरणसम-साध्यसम-कालातीता हेत्वाभासाः । |
| 65 | यस्मात् प्रकरणचिन्ता स निर्णयार्थमपदिष्टः कः? | प्रकरणसमः । |

| | | |
|---|---|---|
| 66 | उपचारच्छलस्योदाहरणं किम्? | मञ्चाः क्रोशन्ति। |
| 67 | 'नवकम्बलोऽस्ये'ति कस्योदाहरणम्? | वाक्छलस्य । |
| 68 | किं नाम छलम्? | वचनविघातोऽर्थविकल्पोपपत्त्या छलम्। |
| 69 | त्रिस्रः कथा के भवन्ति? | वाद-जल्प-वितण्डा च । |
| 70 | वितण्डा का? | प्रतिपक्षस्थापनाहीनो वितण्डा। |
| 71 | शरीरं किम्? | चेष्टेन्द्रियार्थाश्रयः शरीरम्। |
| 72 | छलं कतिविधम्? किञ्च तत्? | त्रिविधम्। वाक्छलं सामान्यच्छलमुपचारच्छलञ्चेति |
| 73 | विप्रतिपत्तिरप्रतिपत्तिश्च किम्? | निग्रहस्थानम्। |
| 74 | कः शब्दः? | आप्तोपदेशः |
| 75 | कः प्रेत्यभावः? | पुनरुत्पत्तिः प्रेत्यभावः |
| 76 | कः संशयः? | समानाऽनेकधर्मोपपत्तेर्विप्रतिपत्तेरुपलब्ध्यनुपलब्ध्यव्यवस्थातश्च विशेषापेक्षो विमर्शः संशयः |
| 77 | सूत्रोक्तं प्रयोजनं किम्? | यमर्थमधिकृत्यप्रवर्तते तत् प्रयोजनम् |
| 78 | सिद्धान्तभेदाः के? | सर्वतन्त्रप्रतितन्त्राऽधिकरणाभ्युपगमसंस्थितिरिति |
| 79 | के अवयवाः? | प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवाः |
| 80 | सूत्रोक्तं हेतुलक्षणं किम्? | उदाहरणसाधर्म्यात्साध्यसाधनं हेतुः |
| 81 | सूत्रोक्तोपनयः कः? | उदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साध्यस्योपनयः |
| 82 | सूत्रोक्तनिगमनं किम्? | हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं निगमनम् |
| 83 | तर्कः कः? | अविज्ञाततत्त्वेऽर्थे कारणोपपत्तितः तत्त्वज्ञानार्थमूहस्तर्कः |
| 84 | निर्णयः कः? | विमृश्य पक्षप्रतिपक्षाभ्यामर्थावधारणं निर्णयः |
| 85 | जल्पः क उच्यते? | यतोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्पः |
| 86 | सम्भवतोऽर्थस्याऽतिसामान्ययोगात्-असम्भूतार्थकल्पना किमुच्यते? | सामान्यच्छलम् |
| 87 | सिद्धान्तमभ्युपेत्य तद्विरोधी क उच्यते? | विरुद्धः |
| 88 | कः कालातीतः? | कालत्ययापदिष्टः कालातीतः |
| 89 | का नाम जातिः? | साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः |
| 90 | किं नाम निग्रहस्थानम्? | विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् |

| ६ अङ्कप्रश्नाः | |
|---|---|
| 1 | अनुमित्युत्पत्तिप्रक्रियां व्याख्यात। |
| 2 | पूर्वपक्षव्याप्तिं परिचाययत। |
| 3 | सिद्धान्तव्याप्तिं व्यख्यात। |
| 4 | परामर्शं व्याख्यात। |
| 5 | पक्षतालक्षणं व्याख्यात। |
| 6 | हेत्वाभासान् परिचाययत। |
| 7 | शाब्दबोधप्रक्रियां व्याख्यात। |
| 8 | उपमित्युत्पत्तिप्रक्रियां व्याख्यात। |

| | |
|---|---|
| 9 | शक्तिं व्याख्यात। |
| 10 | लक्षणां व्याख्यात। |
| 11 | शाब्दबोधकारणानि व्याख्यात। |
| 12 | पदचातुर्विध्यं व्याख्यात। |
| 13 | प्रत्यक्षप्रमाणं  व्याख्यात। |
| 14 | अनमानप्रमाणं व्याख्यात। |
| 15 | प्रमेयसूत्रं व्याख्यात। |
| 16 | आत्मनो अस्तित्वे सूत्रोक्तं प्रमाणं व्याख्यात। |
| 17 | दृष्टान्तं व्याख्यात। |
| 18 | अवयवाः व्याख्येयाः। |
| 19 | वादसूत्रं व्याख्यात। |
| 20 | जल्पसूत्रं व्याख्यात। |
| 21 | 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तराऽपाये तदनन्तरापायादपवर्गः' व्याख्यात। |
| 22 | 'आप्तोपदेशः शब्दः' सूत्रं व्याख्यात। |
| 23 | 'घ्राणरसनचक्षुस्त्वक्-श्रोत्राणीन्द्रियाणि भूतेभ्यः' व्याख्यात। |
| 24 | 'सम्भवतोऽर्थस्याऽतिसामान्ययोगादसम्भूतार्थकल्पना सामान्यच्छलम्' व्याख्यात। |
| 25 | 'साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिः' व्याख्यात। |

| १० अङ्कप्रश्नाः | |
|---|---|
| 1 | 'साध्यवदन्याऽवृत्तित्वम्' लक्षणमिदं समन्वयीकुरुत। |
| 2 | 'हेत्वधिकरणवृत्त्यभावप्रतियोगिसाध्यसामानाधिकरण्यम्' लक्षणमिदं सर्वत्र समन्वयीकुरुत। |
| 3 | व्याप्ति-पक्षधर्मता-परामर्शानाम् अनुमितौ करणत्वं प्रतिपादयत। |
| 4 | पक्षतायाः स्वरूपं विवृणुत। |
| 5 | जातिशक्तिवादमतं निरस्य स्वमतमुपस्थापयत। |
| 6 | सव्यभिचारहेत्वाभासं सोदाहरणमुपपादयत। |
| 7 | असिद्धहेत्वाभासं लक्षणोदाहरणैः विशदीकुरुत। |
| 8 | विरुद्धसत्प्रतिपक्षबाधहेत्वाभासान् व्याख्यात। |
| 9 | शाब्दबोधकारणानि विशदीकुर्वन्तु। |
| 10 | शक्तिग्रहकारणानि मुक्तावल्यनुसारं प्रतिपादनीयानि। |
| 11 | प्रथमेऽध्याये प्रतिपादतविषयान् सङ्क्षेपेण परिचाययन्तु। |
| 12 | षोडशपदार्थान् भाष्यदिशा प्रतिपादयन्तु। |
| 13 | आत्मशीरेन्द्रियेति प्रमेयसूत्रार्थं भाष्यदिशा विवृण्वन्तु। |
| 14 | 'तदत्यन्तविमोक्षोऽपवर्गः' भाष्यानुसारं सूत्रमिदं व्याख्यात। |
| 15 | संशयलक्षणं भाष्यानुसारं विशदीकुर्वन्तु। |
| 16 | सप्रभेदं च्छलं भाष्यदिशा प्रतिपादयन्तु। |
| 17 | सप्रभेदं सोदाहरणञ्च सिद्धान्तं विशदीकर्वन्तु। |
| 18 | पञ्चावयवाः सोदाहरणं व्याख्येयाः। |
| 19 | हेत्वाभासाः न्यायभाष्यदिशा प्रतिपादयन्तु। |
| 20 | तर्कनिर्णयौ यथाभाष्यं व्याख्येयौ। |